शास्त्रि तृतीय खण्डस्य कृते (साहित्यम्)

कालिदासस्य काव्यकला सौष्ठव प्रतिपादनम् ।

महाकविः कालिदासोऽस्माकं राष्ट्रियकविरासीत् । भारतीय संस्कृतेश्च प्रामुख्येनाऽऽख्यानः परिपोषक आसीत् । तेनैव कारणमस्ति यानि भारतीया संस्कृतिर्भाषते । तन्नाटकेषु च एव मनोरमं रूपं प्रदर्श्य मानवमात्रस्य मनोरञ्जनं विदधाति । अस्य काव्येषु पद लालित्य, रचनाचातुर्य, कल्पना शक्ति, प्रकृति चित्रण, चरित्र चित्रणादीनि अधीत्य विशेषं प्रत्येकः पाठकः प्रफुल्लितो जायते । अस्य काव्येषु विचारगाम्भीर्यमस्ति । पदे-पदे संसारस्य बहुमूल्याः सिद्धान्ताः उपदेशाश्चोपलभ्यन्ते । तत्काव्येषु प्रसादगुणस्याबाहुल्यता, माधुर्य गुणस्य मधुरः सन्निवेशः कोमलकान्त पदानां प्राचुर्यम्, उपमालङ्कारस्य अपूर्वत्वम्, अलङ्काराणां रमणीयत्वम्, छन्दसां मनोहरत्वं भाव सौन्दर्यं चेत्यादीनि पर्याप्तरूपेण विद्यन्ते । तत्काव्येषु विद्यमानाः सरस सरल सुबोध शब्दाः न केवलं सहृदयानामपि तु सामान्य जनानामपि मनांसि मुग्धी कुर्वन्ति । व्यङ्ग्यार्थ प्रतिपादनस्य विलक्षणा शैली एवं प्रकृतेः रमणीयं प्रकाशनम्, विस्तृत विषयस्य संक्षेपेण वर्णनम् वर्ण्य विषयस्य मनोहर क्रमेण स्थापनं लोकोत्तरानन्द प्रदानं इत्यादि प्रभृतयोः अनेके विशिष्टाः गुणाः कालिदासस्य काव्येषु राजन्ते ।

महाकविः कालिदासः संस्कृत साहित्याकाशे रविरिवाभाति नक्षत्रैः स्वीक्रियते बुधैः । कालिदासोऽन्तर्जगतो बाह्य जगतश्चोभयस्यापि दृश्य दर्शी कविरस्ति । अस्मिन् दृष्ट्या प्रसाद गुणस्तु तत्काव्येषु सर्वत्र व्याप्त एव । तथापि अन्येषां कवीनामपेक्षया उपमालङ्कारस्य एव कालिदासस्य प्रसिद्धो वर्तते । 'उपमा कालिदासस्य' इत्युक्तिः सुप्रसिद्धैव । महाकविना अभिज्ञान शाकुन्तलनाटकस्य चतुर्थेऽङ्के परम दृश्यताम्: शकुन्तलायाः पतिगृह प्रस्थानकाले न केवलाश्रम वासिनो मनुष्याः अपितु मृगा मयूरचक्रवाकाः तिर्यञ्च लतावृक्षादयः रोदिताः शकुन्तलाम्प्रति महर्षेः कण्वस्योपदेशः दुष्यन्तम्प्रति सन्देशस्तु सर्वेषामपि गृहस्थलोकानां कृते स्मरणीयो, अनुकरणीयो, पालनीयश्च । तपोवनस्य पावने वातावरणे वर्धिता शकुन्तला साक्षात्प्रकृतिकन्येव प्रतीयते ।

वाल्मीकेः व्यासाच्चानन्तरं विद्वत्समाजे सर्वप्रथम महाकवि रूपेण कालिदास एव प्रतिष्ठितः । समस्तकवित्वगुणसमन्वितः महाकविः कालिदासः । तद्विषये मल्लिनाथेनोक्तम् —

'कालिदासगिरां सारं कालिदास सरस्वती ।
चतुर्मुखोऽथवा ब्रह्मा विदुर्नान्ये तु मादृशाः ॥'

मानव हृदयेन सह जडप्रकृतेः सूक्ष्मसम्बन्ध प्रदर्शनमेव महाकविकालिदासस्य लोकोत्तरं वैशिष्ट्यमस्ति । मूकजडस्यापि पदार्थाः मानवीयं अनुभूतिपूर्णा जायन्ते । तद्रचनायां स्थावराः जङ्गमाश्च सर्वेऽपि पदार्थाः परस्परं सुखदुःखे अनुभवन्ति । यद्यपि कालिदासो रससिद्धो महाकविरस्ति तथापि स विशेषतः शृङ्गार-करुण-शान्तादिभूत रसप्रतिपादने पटुरस्ति इति

उपेन्द्र झा
13/10/20
व्या० प्रा० साहित्य
रा० उ० सं० महावि०
मुकोला, ...

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
वेणीसंहार नाटकस्य श्लोक व्याख्या

चञ्चद्भुजभ्रमितचण्डगदाऽभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानाऽवनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि! भीमः॥१

प्रस्तुतोऽयं श्लोकः वीररस प्रधान कवि रूपेण ख्याति लब्धः महाकविः भट्टनारायणस्य अनूठ्य कृतिः वेणीसंहार नाम नाटकस्य प्रथमङ्कात् समुद्धृतोऽस्ति। श्लोकेऽस्मिन् यदा द्रौपद्याश्चेटी भीमं द्रौपद्याः तिरस्कार प्रतीकारार्थं प्रेरयति तदा क्रुधो भीमसेनः स्व भीषणां प्रतिज्ञां कथयति।

हे देवि! चञ्चद्भुजभ्रमितचण्डगदाभिघात सञ्चूर्णितोरुयुगलस्य सुयोधनस्य स्त्यानावनद्धघन-शोणितशोणपाणिः भीमः तव कचान् उत्तंसयिष्यति।

चञ्चदिति। हे देवि = हे पाञ्चालि! चञ्चद्-भुजभ्रमित-चण्डगदाभिघात सञ्चूर्णितोरुयुगलस्य = चञ्चन्तौ, यौ तौ भुजौ, ताभ्यां = स्फुरद्बाहुभ्यां भ्रमिता = परिभ्रामिताः, या चण्डगदा = भीषणा गदा, तस्याः अभिघातः = प्रहारस्तेन, सञ्चूर्णितेन = चूर्णीकृतम्, उरुयुगलम् = जघनद्वयम्, यस्य तथाविधस्य। सुयोधनस्य = दुर्योधनस्य, स्त्यानावनद्धघनशोणित-शोणपाणिः — स्त्यानं = स्निग्धं, यथा स्यात् तथा अवनद्धं = संसक्तं, यद्घनं = सान्द्रं शोणितं रुधिरं तेन शोणः = लोहितः, पाणिः = करो यस्य सः भीमः = अयमहं भीमसेनः, तव = ते द्रौपद्याः कचान् = केशान्, उत्तंसयिष्यति = चिरात् उन्मुक्ततया गाढीभूतान् दुर्योधन रुधिरेणैव पुनः वेणीबन्धं प्रापयिष्यति। अत्र वसन्ततिलका वृत्तम्। तल्लक्षणं यथा- उक्ता वसन्ततिलका तभजा जगौ गः इति।

उपेन्द्र झा
13/10/20
सहा० प्रा० साहित्य
रा० आ० सं० महावि०
फुलटेक, खगड़िया

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
अभिज्ञान शाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या

"इदं किलाव्याज मनोहरं वपु वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
समीलतां छेत्तुमृषिर्व्यवस्यति ॥"

श्लोकेऽस्मिन् आखेट क्रमे राजानं वैखानसेन मृगमारणा निवारितः सम्प्रार्थनया चातिथि सत्कार ग्रहणाया श्रमं प्रविशन् राजा दुष्यन्तः यदा सखीभ्यां सह आश्रम वृक्षान् सिञ्चन्तीं शकुन्तलां ददर्श तदा अन्तःपुरिकाभ्योऽपि रमणीय तरया तस्याः सौन्दर्येण प्रभावितः सन् तमाश्रमधर्मे नियोक्तारं महर्षिं काश्यमुपालभते ।

यः इदं किल अव्याजमनोहरं वपुः तपःक्षमं साधयितुं इच्छति, सः ऋषिः ध्रुवं नीलोत्पलपत्रधारया शमी-लतां छेत्तुं व्यवस्यति ।

किल = निश्चयेन यः = ऋषिः इदं = पुरोदृश्यमानम् वपुः = शरीरं अव्याजमनोहरं = स्वाभाविकसुन्दरं तपः = तपस्यायाः क्षमं = सहनयोग्यं साधयितुं = निर्मातुम् इच्छति = वाञ्छति, स = ऋषिः ध्रुवं = निश्चयेनैव नीलोत्पलपत्रधारया = नील कमल पत्रस्य धारया शमीलतां = तन्नाम्नीं लतां छेत्तुं = कर्तयितुं व्यवस्यति = उद्योगं करोति एवम् यथा नीलोत्पलपत्रधारया शमीलतां कर्तन उद्योगः अनुचितस्तथैव शकुन्तलायाः आश्रम धर्मे नियोगोऽपि अनुचित एव ।

अत्र सुकुमारेण शकुन्तला शरीरेण आश्रमधर्मं पालनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छावत् इति निदर्शनाऽलङ्कारः - 'अभवन् वस्तु सम्बन्धः उपमापरिकल्पकः' इति लक्षणात् । 'ध्रुवमित्यनेनोत्प्रेक्षेति' निदर्शनोत्प्रेक्षयोः परस्परं निरपेक्षयोः एकत्र वर्तमानत्वात् संसृष्टिः वंशस्थवृत्तम् - जतौ तु वंशस्थमुदीरितं जरौ इति

उपेन्द्र झा
12/10/20
असि० प्रो० साहित्य
रा० सं० सं० महाविद्यालय
कुरुक्षेत्र, हरियाणा